# Shri Rama Sambodhana Stotram

# શ્રીરામસમ્બોધનસ્તોત્રમ્

## Document Information

Text title : Shri Rama Sambodhana Stotram

File name : rAmasambodhanastotram.itx

Category : raama

Location : doc_raama

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : From stotrArNavaH

Latest update : September 12, 2020

Send corrections to : sanskrit@cheerful.com


This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.


September 13, 2020

*sanskritdocuments.org*

# શ્રીરામસમ્બોધનસ્તોત્રમ્

મત્સ્ય કૂર્મ કિટે મર્ત્યસિંહ વામન ભાર્ગવ ।
રામ પ્રલમ્બહન્ કૃષ્ણ કલ્કિન્(કલ્કે)પાહિ દશાકૃતે ॥ ૧॥

॥ બાલકાણ્ડઃ ॥

રામ દાશરથે રક્ષ કૌસલ્યાતનયાગ્રજ ।
ભરતસ્ય ચ સૌમિત્ર્યોઃ ક્રીડાપર મનોહર ॥ ૨॥

અધીતવેદવેદાઙ્ગધનુર્વેદ મહામતે ।
કૌશિકાર્થિત તલ્લબ્ધબલાતિબલ પાહિ મામ્ ॥ ૩॥

તાટકાતાટકેયારે ગાધિજાધ્વરરક્ષક ।
પાદરેણુકણત્રાતાહલ્ય કલ્યો વને મમ ॥ ૪॥

માહેશ્વરધનુર્ભઙ્ગપ્રીતવૈદેહતત્સુત ।
ગૃહીતપાણે સીતાયાઃ સ્વતાતસ્ય નિયોગતઃ ॥ ૫॥

જામદગ્ન્યનિરુદ્ધાધ્વન્ ધનુષા તત્તપોહર ।
પ્રવિષ્ટાયોધ્ય ભુઞ્જાન માનુષાન્ ભોગસઞ્ચયાન્ ॥ ૬॥

બહૂનૃતૂન્ ભુવિજયા સાર્ધં તં માનસાર્પિતં (સન્માનસાર્ચિતં) ।
શ્રિયા વિષ્ણુરિવાજસ્રં તયા શોભિત પાહિ મામ્ ॥ ૭॥

॥ અયોધ્યાકાણ્ડઃ ॥

રાજ્યદાનસમુદ્યુક્તજનકાસઙ્ખ્યસદ્ગુણ ।
મન્થરાહિતરોષેણ કૈકેય્યા વિઘ્નિતોત્સવ ॥ ૮॥

સન્ત્યક્તરાજ્ય તત્પ્રીત્યૈ વનવાસમહોદય ।
સસીતાલક્ષ્મણારણ્યં પ્રયાતોદ્દિશ્ય તાપસ ॥ ૯॥

અનુયાત જનેનાપિ દૂરં સાકેતવાસિના ।
પિતૃભ્યાં તમસાતીરં પ્રાપ્ત વઞ્ચિતતજ્જન ॥ ૧૦॥

શૃઙ્ગિબેરપુરે લબ્ધનિષાદક્ષિતિભૃત્સખ ।
તીર્ણગઙ્ગાસરિત્ ભૂયસ્સન્નિવર્તિતસારથે ॥ ૧૧॥

(ભરદ્વાજસ્ય) વચસા ચિત્રકૂટમુપાગત ।
સીતયા પ્રાપ્તવિહૃતે રમ્યેષ્વેતસ્ય સાનુષુ ॥ ૧૨॥

પિતુર્મરણતઃ પશ્ચાન્માતુલસ્ય કુલાત્ પુરીમ્ ।
અયોધ્યામાગતેનાત્મજ(નકાદર્શનો)દ્ભવાત્ ॥ ૧૩॥

કોપાત્ સન્તપ્તમનસા રાજ્યપ્રાપ્તૌ વિરાગિણા ।
વસિષ્ઠાદ્યનુશિષ્ટેન નિન્દિતાપ્તપુરોધસા ॥ ૧૪॥

ભ્રાત્રા શિષ્યેણ દાસેન ભરતેન (મુહુર્મુહુઃ) ।
શિરસા યાચિતાસ્મૈ તુ દત્તશ્રીપાદુકાદ્વય ॥ ૧૫॥

તસ્મિન્નિવૃત્તે સન્ત્યજ્ય ચિત્રકૂટગિરિં ગત ।
અત્ર્યાશ્રમં તત્પ્રિયયાનસૂયાભિખ્યયા તતઃ ॥ ૧૬॥

દિવ્યામ્બરાઙ્ગરાગાદિવસ્તુના જાનકીગુણૈઃ ।
પ્રીતયા માનિતાત્મીયદારાનિન્દિતતત્પદ ॥ ૧૭॥

॥ અરણ્યકાણ્ડઃ ॥

પ્રવિષ્ટદણ્ડકારણ્ય તદ્વાસિમુનિસત્તમૈઃ ।
આશાસાનૈ(ર્દૈત્યવધં) સ્વરક્ષાર્થમુપસ્થિત ॥ ૧૮॥

પ્રતિશ્રુતાવનૈતેષાં ભવદ્વિષયવાસિનામ્ ।
વિરાધમાથિન્નાત્મીયપાદચારાઞ્ચિતાશ્રમ ॥ ૧૯॥

શરભઙ્ગાદિયમિનાં વચસા(પ્રીતમાનસ) ।
પ્રાપ્તપઞ્ચવટીસ્થાન રમ્યે ગોદાવરીતટે ॥ ૨૦॥

વૃષસ્યન્ત્યા શૂર્પણખ્યા પતિત્વેનાર્થિતાર્તયા ।
સૌમિત્રિણા છિન્નનાસાકર્ણ તસ્યાઃ સ્વબાહુના ॥ ૨૧॥

તત્ક્ષણેન તદાર્ત્યુત્થખરાદિરિપુભઞ્જન ।
ચતુર્દશસહસ્રત્રિયામાચરનિષૂદન ॥ ૨૨॥

તચ્છ્રુત્વા સરુષા પઙ્ક્તિવદનેન તનૂજતઃ (? ) ।
સુન્દસ્ય સ્વસહાયેન માયામૃગવપુર્ભૃતા ॥ ૨૩॥

વિલોભિતાત્મદારાથ તયા પ્રેરિત તદ્ગૃહે ।
મારીચાનુગતૈતસ્ય પ્રાણહારિન્નનુદ્રુત ॥ ૨૪॥

જાનકીવાક્યતપ્તેન લક્ષ્મણેન દશાસ્યતઃ ।
વિજનાદાશ્રમપદાત્ ગૃહીતપ્રિય ચોરતઃ ॥ ૨૫॥

મધ્યેમાર્ગં ખગેન્દ્રેણ વિરથેન કૃતાજિના ।
તત્પ્રાણહારિણાશોકવનિકાસ્થાપિતપ્રિય ॥ ૨૬॥

નિવૃત્તારણ્યતસ્સીતાઽદર્શનાત્તપ્તમાનસ ।
અરણ્યેષુ મહીધ્રેષુ સરિત્સુ સરસીષુ ચ ॥ ૨૭॥

મહિલાવિચિતોન્મત્તદશાપન્ન સ્મરાર્તિમન્ ।
કૃતસંસ્કારગૃધ્રેશ બ્રહ્મમેધવિધાનતઃ ॥ ૨૮॥

તન્મોક્ષદાયિન્ સત્યેન જિતલોકપ્રદાનતઃ ।
શુશ્રૂષયા ચ ધનુષા જિતદીનાર્યશત્રુક ॥ ૨૯॥

હતયોજનબાહ્વાખ્યોદરતૂરકબન્ધક (? ) ।
(તતઃ પ્રસ્થાય) શબરીં પ્રાપ્ત સમ્પૂજિતૈતયા ॥ ૩૦॥

॥ કિષ્કિન્ધાકાણ્ડઃ ॥

પમ્પાતીરે હનુમતા સઙ્ગતાથાગ્રજન્મના ।
વાલિના સૂનુના ભાનોર્નિરસ્તેન સમન્ત્રિણા ॥ ૩૧॥

ઋશ્યમૂકાદ્રિશિખરે કૃતસખ્યાગ્નિસાક્ષિકમ્ ।
સાલભઞ્જનસઞ્જાતપ્રત્યયેન તદુક્તિતઃ ॥ ૩૨॥

હતવાલિન્ પુનસ્તસ્મૈ દત્તવાનરરાજત ।
સહતારારુમં વર્ષાકાલે માલ્યવદાહ્વયે ॥ ૩૩॥

ગિરૌ સીતાવિરહજં પ્રાપ્ત દુઃખમગોચરમ્ ।
વાચાં, કનીયસાશ્વસ્ત કુપિતે મત્તચેતસિ ॥ ૩૪॥

ગ્રામ્યભોગરતે ભાનુતનયે સ્વાનુજે પુરીમ્ ।
કિષ્કિન્ધાં યાતિ તદ્દ્વારે વિહિતજ્યારવે સતિ ॥ ૩૫॥

ભીતેન હનુમદ્વાક્યાત્ સુમિત્રાત્મજસાન્ત્વને ।
તારાં પ્રેષયતા તેન કપીન્ સઙ્ગૃહ્ણતાખિલાન્ ॥ ૩૬॥

અરણ્યપર્વતનદીવાસાનતિબલોત્કટાન્ ।
દિક્ષુ પ્રેષયતા સર્વાસ્વશેષાન્ વદતાદ્ભુતાન્ ॥ ૩૭ ॥

તેભ્યો દેશાન્ સમન્વિષ્ટવૈદેહતનયાત્મજે ।
વાયોરર્પિતકાર્યત્વાદ્દત્તાઙ્ગુલિવિભૂષણ ॥ ૩૮ ॥

તારાઙ્ગદાદિયુક્તેન તત્ર તત્ર વિચિન્વતા ।
સીતાં કાલાત્યયાત્તીક્ષ્ણદણ્ડત્વાદ્વાનરપ્રભોઃ ॥ ૩૯ ॥

ભીતેનાશ્વસ્તમનસા સમ્પાતેર્વચસા પુનઃ ।
સ્વભ્રાતૃવધદુઃખસ્ય તસ્મૈ દત્તજલાઞ્જલેઃ ॥ ૪૦ ॥

અશોકવનિકાવાસસીતાદર્શિસ્વચક્ષુષઃ ।
રામસાહાય્યકરણસમુત્થિતગરુત્મતઃ ॥ ૪૧ ॥

॥ સુન્દરકાણ્ડઃ ॥

મહેન્દ્રશૈલારૂઢેન તૂર્ણં તીર્ણપયોધિના ।
અનાશ્વસ્તેન તન્મધ્યે સિંહિકાદ્યનિરોધિના ॥ ૪૨ ॥

પ્રવિષ્ટેન પુરીં લઙ્કાં રાત્રૌ તદ્દેવતા જિતા ।
શીધુપાનમદાવિષ્ટનિદ્રાણસ્ય વધૂસ્તતઃ ॥ ૪૩ ॥

દશાસ્યસ્યાલોકયતા નિરાશેનાપિ દર્શને ।
વૈદેહ્યાઃ શિંશપામૂલે વસન્ત્યાસ્તત્તરોઃ પુનઃ ॥ ૪૪ ॥

દલાવૃતેન કથિતાશેષરાઘવવૃત્તતઃ ।
પ્રત્યયાર્થં સશઙ્કાયઃ સીતાયા ભૂરુહાત્તતઃ ॥ ૪૫ ॥

અવતીર્ણેન દત્તસ્વકરભૂષેણ સીતયા ।
આલોકિતેન શસ્તેન કૃતસમ્ભાષણેન ચ ॥ ૪૬ ॥

ઉક્તકાકાદિવૃત્તેન દત્તચૂડાવિભૂષતઃ ।
ઉક્તસ્વદૈન્યવાક્યેન સ્વમુદ્દિશ્ય તુ જીવનમ્ ॥ ૪૭ ॥

અનુજ્ઞાતેન રચિતાશોકકાનનભઙ્ગતઃ ।
પ્રાસાદભેદિના રમ્યતોરણં સમુપેયુષા ॥ ૪૮ ॥

દાસોઽહં કોસલેન્દ્રસ્યેત્યાદિ શ્રાવયતા વચઃ ।
કિઙ્કરાન્ પઞ્ચ સેનેશાન્ સપ્ત મન્ત્રિસુતાનપિ ॥ ૪૯ ॥

જમ્બુમાલિનમક્ષં ચ યુદ્ધે હતવતા બલાત્ ।
વલારિજિદ્વિસૃષ્ટેન બ્રાહ્મણાસ્ત્રેણ બન્ધનાત્ ॥ ૫૦॥

રજ્જ્વન્તરાણાં સંસર્ગાદ્વિમુક્તેનાઞ્જસા પુનઃ ।
તજ્જ્ઞાત્વાપિ કૃતાં પીડાં સહમાનેન રાક્ષસૈઃ ॥ ૫૧॥

પ્રવિષ્ટેન દશગ્રીવસભાં યાતુભિરાવૃતામ્ ।
કથિતસ્વકપીશાનસખ્યમુખ્યપ્રવૃત્તિના ॥ ૫૨॥

કુપિતેનારિણા હિંસાં કર્તુમુદ્યુઞ્જતા પુનઃ ।
વિભીષણવચોભઙ્ગીવિનિવર્તિતચેતસા ॥ ૫૩॥

દહતાસ્ય પ્રિયં વાલમિત્યાદિષ્ટવતા ભટાન્ ।
દગ્ધવાલેન વાલાગ્નિદગ્ધારિપુરવેશ્મના ॥ ૫૪॥

વૈદેહીકરુણાવાક્યશીતલાઙ્ગૂલવહ્નિના ।
પ્રસ્થિતેન પુનઃ શૈલં ત્રિકૂટમધિતિષ્ઠતા ॥ ૫૫॥

તીર્ણવારિધિના સર્વૈર્નન્દિતેનાઙ્ગદાદિભિઃ ।
તેભ્યઃ પ્રોક્તસ્વવૃત્તેન પાનેઽનુમતિદાયિના ॥ ૫૬॥

મધુનો વારિતવતા તદ્વનાવનવાનરાન્ ।
દધિવક્ત્રમુખાનાત્મસન્નિધાનમુપેયુષા ॥ ૫૭॥

વિજ્ઞાપિતાત્મમહિલાદૃષ્ટિવાક્ય હનૂમતા ।
પ્રશંસિત પરિષ્વક્તમારુતાત્મજ તે નમઃ ॥ ૫૮॥

॥ યુદ્ધકાણ્ડઃ ॥

શ્રુત્વા હનુમતો વાક્યં હરિવીરૈર્વૃતાધ્વનિ ।
સુગ્રીવપ્રમુખૈસ્તીરં પ્રાપ્ત સિન્ધુમહીપતેઃ ॥ ૫૯॥

તત્રાગતાય સન્ત્યજ્ય પૂર્વજં કાલચોદિતમ્ ।
(સત્ય)વાક્યમશ◌ૃણ્વન્તં મૈથિલીદાનગોચરમ્ ॥ ૬૦॥

સ્વનિન્દનપરિત્યક્તપુત્રદારાય ધીમતે ।
આત્માનં સર્વલોકાનાં શરણ્યં ભજતે ગતિમ્ ॥ ૬૧॥

સુગ્રીવાદીન્ પુરસ્કૃત્ય સ્વાકિઞ્ચન્યપુરસ્સરમ્ ।
વિભીષણાય સર્વેભ્યો ભૂતેભ્યોઽભયદાયક ॥ ૬૨॥

ઇમમાશઙ્કમાનાનાં સુગ્રીવાદિવનૌકસામ્ ।
પરિહારકર સ્વીયસામર્થ્યસ્ય પ્રદર્શનાત્ ॥ ૬૩॥

ભૂયસ્તદનુમત્યા તમઙ્ગીકૃત્યાભિષેચનમ્ ।
કૃતવાંસ્તસ્ય તદ્વાક્યાત્ સમુદ્રં શરણાગત ॥ ૬૪॥

દર્ભાનાસ્તીર્ય તત્તીરે પ્રાઙ્મુખાઞ્જલિબન્ધન ।
ઉપાધાય ભુજ સ્વીયં શયાન પ્રતિવારિધિમ્ ॥ ૬૫॥

તસ્મિન્નદત્તવદને સન્ત્યક્તક્ષમ કોપન ।
ચાપસંહિતહૈરણ્યગર્ભાસ્ત્રાસ્મિન્ સમાગતે ॥ ૬૬॥

નિષ્કોપોત્તરપાથોધિતીરસ્થાસુરમર્દન ।
તેન તદ્વાક્યતો બધ્દ્વનલસેતો તદમ્ભસિ ॥ ૬૭॥

તીર્ણવારિનિધે શાખામૃગસઙ્ગૈઃ સહાચિરાત્ ।
તસ્ય દક્ષિણતીરે તુ પ્રાપ્તલઙ્કાપુરાન્તિક ॥ ૬૮॥

અધ્વયાનપરિશ્રાન્ત ત્રાતવાનરસૈન્યક ।
સુવેલશૈલશૃઙ્ગસ્થ સુગ્રીવપ્રમુખૈઃ સહ ॥ ૬૯॥

દૃષ્ટત્રિકૂટમૂર્ધસ્થલઙ્કાપુર સમન્તતઃ ।
તદીશમકુટીભઙ્ગકૃતા વાનરભૂભૃતા ॥ ૭૦॥

પુનઃ સઙ્ગત તત્સ્તોત્રપર તત્સાહસાક્ષમ ।
નિરુધ્દ્વલઙ્કાનગર કાનનાલયપુઙ્ગવૈઃ ॥ ૭૧॥

શક્રજિત્પ્રેરિતૈર્નાગપાશૈર્બધ્દ્વાઙ્ગ પક્ષિણામ્ ।
નાથેન મુક્તગાત્રાસ્માદ્બન્ધનાદપિ કર્કશાત્ ॥ ૭૨॥

હતધૂમ્રાક્ષ પુત્રેણ મરુતો વાલિસૂનુના ।
વજ્રદંષ્ટ્રાસુહનનકર મારુતસૂનુના ॥ ૭૩॥

હતાકમ્પન નીલેન હત(કપિ) સેન મહીભૃતા ।
હતરાવણસૈન્યેશપ્રહસ્તાહ્વયરાક્ષસ ॥ ૭૪॥

પ્રથમાયોધને પઙ્ક્તિમુખપ્રેરિતશક્તિતઃ ।
વિધ્દ્વલક્ષ્મણ તેનાનુધ્દ્વૃતાવરજ શત્રુણા ॥ ૭૫॥

વાયુસૂનોસ્તુ સૌહાર્દાદ્ભક્ત્યા પરમયાપિ ચ ।

ઉદ્ધૃતૌ ॥। ॥। કનિષ્ઠાશ્રિતવત્સલ (?) ॥ ૭૬॥

સમિતાવધિરૂઢાંસસદાગતિસુતોત્તમ ।
પરાજિતસ્વબાણાર્તિમુક્તચાપદશાનન ॥ ૭૭॥

ગત્વા વિશ્રમ્યતાં લઙ્કામિત્યનુજ્ઞાપ્રદેશિતુઃ ।
રક્ષસાં સ્વાશુગસ્મૃત્યા વ્યથિતારાતિમાનસ ॥ ૭૮॥

તદ્ભયેનાતિનિદ્રસ્યોત્થાપિતસ્યાતિયત્નતઃ ।
ગિરિમાત્રશરીરસ્ય કુમ્ભકર્ણસ્ય યુધ્યતઃ ॥ ૭૯॥

કપિરાજનખાલ્લૂનકર્ણનાસસ્ય નર્દતઃ ।
વધકારિન્ વાલિસૂનુહસ્તાહતનરાન્તક ॥ ૮૦॥

હનુમત્સંહૃતસ્વર્ગનિલયાન્તક તેન ચ ।
હતત્રિશીર્ષાતિકાયપ્રાણાસંહારિલક્ષ્મણ ॥ ૮૧॥

રાવણીરિતવિધ્યસ્ત્રવિવશાઙ્ગાનુજાદિભિઃ ।
સાર્ધં વાયુસુતાનીતદિવ્યૌષધવિશેષતઃ ॥ ૮૨॥

વિમુક્તપીડ સુગ્રીવહતકુમ્ભ હનૂમતા ।
નિકુમ્ભપ્રાણહરણ મકરાક્ષહર સ્વયમ્ ॥ ૮૩॥

નિકુમ્ભિલાયાં શક્રારિકૃતહોમવિઘાતતઃ ।
વિભીષણવચોજાતાત્ કુપિતેનેન્દ્રવૈરિણા ॥ ૮૪॥

સાર્ધં કૃતાજિના નાનાદિવ્યાસ્ત્રજ્ઞેન ધીમતા ।
ધર્માત્મેત્યાદિપદ્યેન પ્રતિજ્ઞાં કુર્વતા તતઃ ॥ ૮૫॥

સૌમિત્રિણા સ્વાનુજેન હતપ્રાણેન્દ્રશાત્રવ ।
મિષત્સુ વાનરેન્દ્રેષુ નાનામૂર્તિધર સ્વયમ્ ॥ ૮૬॥

હતમૂલબલાઢ્યેન શૌર્યવીર્યાદિસમ્પદા ।
નાનાસ્ત્રવિદુષા દેવસઙ્ઘગર્વાપકર્ષિણા ॥ ૮૭॥

કૃતાજે પઙ્ક્તિવક્ત્રેણ સ્યન્દનં જમ્ભભેદિનઃ ।
આરુહ્ય સૂતેનાનીતં દિવ્યં માતલિનાસ્ત્રતઃ ॥ ૮૮॥

અનેકધા વિલૂનારિદશશીર્ષ સ્વયમ્ભુવઃ ।
અસ્ત્રેણ સંહૃતારાતે પૂર્વજસ્યોત્તરક્રિયામ્ ॥ ૮૯॥

કૃતચિત્તસમાધાન ન ચિકીર્ષોર્જુગુપ્સયા ।
વિભીષણસ્ય તેનૈવ વિહિતારાતિસંસ્કૃતે ॥ ૯૦॥

પ્રલાપવાક્યૈસ્તત્સ્ત્રીણાં નિજપારમ્ય(સૂચકૈઃ) ।
જ્ઞાપિતોત્કર્ષ સીતાયાં શ્રુત્વા વિજયમાહવે ॥ ૯૧॥

નિજં હનૂમદ્વાક્યેન સન્તુષ્ટૌ રાક્ષસીગણમ્ ।
અપરાધિનમપ્યસ્માદ્રક્ષન્ત્યાં દયયા તતઃ ॥ ૯૨॥

વિભૂષિતાયાં ભૂષાભિઃ સ્નાતાયાં નિજમન્તિકમ્ ।
વિભીષણેનાનીતાયામશોકગહનાદરેઃ ॥ ૯૩॥

નિજચારિત્રસન્દેહાત્ પ્રવિશન્ત્યાં હુતાશનમ્ ।
સમાગતૈર્બ્રહ્મમુખ્યૈર્દૈવતૈર્વિહિતસ્તુતે ॥ ૯૪॥

તાતં નિજં પુરસ્કૃત્ય દત્તસીત કૃશાનુના ।
શક્રાદિવરલાભેન સમુત્થાપિતવાનર ॥ ૯૫॥

કૃતાભિષેક લઙ્કાયાં રાવણાવરજસ્ય તુ ।
યક્ષનાથવિમાનેન પુષ્પકેણાશુગામિના ॥ ૯૬॥

પ્રતિપ્રયાત વૈદેહ્યૈ પ્રોક્તસ્વચરિતાધ્વનિ ।
સુગ્રીવપ્રમુખૈઃસ્સાર્ધં સહદારૈઃ પ્લવઙ્ગમૈઃ ॥ ૯૭॥

ભરદ્વાજાશ્રમં પ્રાપ્ત વર્ષે પૂર્ણ ચતુર્દશે ।
આર્તાય ભરતાયાથ પ્રેરિતાનિલસમ્ભવ ॥ ૧૮॥

અભિયાતામુના સાર્ધં વસિષ્ટાદ્યૈઃ સમન્ત્રિભિઃ ।
નન્દિગ્રામગત ત્યક્તજટ સ્નાત વિભૂષણૈઃ ॥ ૯૯॥

ભૂષિતાઙ્ગાભ્યનુજ્ઞાતયાન યક્ષમહીભૃતે ।
સ્યન્દનારૂઢ સંપ્રાપ્તસાકેતનગર જનૈઃ ॥ ૧૦૦॥

પૌરૈરસ્માદ્ભૃત પ્રાપ્ત નિજતાતગૃહોત્તમમ્ ।
વસિષ્ઠાદ્યૈઃ સસચિવૈરભિષિક્ત પિતુઃ પદે ॥ ૧૦૧॥

વિભીષણાય દત્તસ્વકુલનાથાત્મભક્તયે ।
વિસૃષ્ટ ભાનુતનયમુખવાનરસઞ્ચય ॥ ૧૦૨॥

॥ ઉત્તરકાણ્ડઃ ॥

વત્સરાન્ દશસાહસ્રાન્ દશવર્ષશતાન્વિતાન્ ।
નીતિશાસ્ત્રપ્રકારેણ પાલિતાવનિમણ્ડલ ॥ ૧૦૩॥

કૃતાશ્વમેધ રચિતવાજપેય પુનઃ પુનઃ ।
તથા બહુસુવર્ણાદિક્રત્વનુષ્ઠાનતત્પર ॥ ૧૦૪॥

સામન્તરાજમકુટીખચિતૈર્મણિમણ્ડલૈઃ ।
નીરાજિતપદામ્ભોજદ્વન્દ્વ ભૂજનરઞ્જન ॥ ૧૦૫॥

હૃષ્ટૈર્દશાસ્યનિધનાદભિનન્દિત યોગિભિઃ ।
કુમ્ભોદ્ભવમુખૈઃ પ્રોક્તરાવણાદિકથાગણૈઃ ॥ ૧૦૬॥

અન્તર્વત્ન્યાં તુ સીતાયાં વનવાસરતૌ પુનઃ ।
તદ્વ્યાજાજ્જનવાર્તાર્તચેતો વાલ્મીકિસદ્મનિ ॥ ૧૦૭॥

લક્ષ્મણસ્થાપિતાત્મીયદાર તસ્યામથાશ્રમે ।
મુનેર્યમૌ પ્રસૂતાયાં નામ્ના કુશલવૌ સુતૌ ॥ ૧૦૮॥

તયોર્વૃદ્ધિમતોસ્તેન મુનીન્દ્રેણોપનીતયોઃ ।
અધીતસાઙ્ગસશિરોવેદયોર્મુનિના કૃતમ્ ॥ ૧૦૯॥

તેન રામાયણં વાચો વિધેયં કુર્વતોઃ સતોઃ ।
ક્રિયમાણે વાજિમેધે જાનાનાં પુરવાસિનામ્ ॥ ૧૧૦॥

તથા જાનપદાનાં ચ રાજ્ઞાં સંસદિ યોગિનામ્ ।
તાભ્યાં વિજ્ઞાપિતસ્વીયપ્રબન્ધ ભ્રાતૃભિઃ સહ ॥ ૧૧૧॥

શ્રવણાદસ્ય સન્તુષ્ટમાનસામ્બુજ ? ? ।
ચરેભ્યોઽપ્યચરેભ્યોઽપિ દૂર્વાદિભ્યસ્ત્વહેતુકમ્ ॥ ૧૧૨॥

સાકેતદેશવાસિભ્યો દત્તમોક્ષ દયાનિધે ।
વિજયીભવ નિત્યં ત્વમયોધ્યાધિપનન્દન ॥ ૧૧૩॥

મઙ્ગલં રાઘવાયાસ્તુ મઙ્ગલં લક્ષ્મણાય ચ ।
મઙ્ગલં ભરતાયાસ્તુ શત્રુઘ્નાયાપિ મઙ્ગલમ્ ॥ ૧૧૪॥

સીતાયૈ મઙ્ગલં ભૂયાત્તનયાય સદાગતેઃ ।
તત્સેવનપરાયાસ્તુ તદ્ભક્તિસ્નેહરાશયે ॥ ૧૧૫॥

પુરાય ભૂયાત્ સાકેતનામ્ને દિવ્યર્ધિમીયુષે ।
અસ્તૂત્તરાય દેશાય કોસલાયાપિ મઙ્ગલમ્ ॥ ૧૧૬॥

સમ્બોધનમિદં સ્તોત્રં સૂનુના વાદિભીકૃતઃ ।
વેઙ્કટેશેન રામસ્ય રચિતં જયતાત્ સદા ॥ ૧૧૭॥

ઇતિ શ્રીરામસમ્બોધનસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by Aruna Narayanan

*Shri Rama Sambodhana Stotram*
pdf was typeset on September 13, 2020

Please send corrections to *sanskrit@cheerful.com*